6.2.2 Organizational structure of the Institution including governing body, administrative setup, and functions of various bodies, service rules, procedures, recruitment, promotional policies as well as grievance redressal mechanism

**संस्थायां सर्वविधाः प्रबन्धनव्यवस्थासंरचनाः यथा प्रबन्धनसमितिः , प्रशासनव्यवस्था, विविधनिकायानां कार्याणि, सेवानियमाः , प्रक्रियाः , नियुक्तयः , पदोन्नतिनियमाः , व्यथानिवारणक्रियाविधयश्च उपलभ्यन्ते।**

Answer:

**सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य प्रशासनव्यवस्थायाम् अधोलिखिताः सम्मिलिताः सन्ति।**

1. **कुलाधिपतिः**

उत्तरप्रदेशशासनस्य राज्यपालः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य कुलाधिपतिः अस्ति। कुलाधिपतेः चयनं शासनं परिनियमानाम् आधारेण करोति। पदाभिधानदृष्ट्याकुलाधिपतिः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य प्रधानः वर्तते। सः विश्वविद्यालयस्य उपाधिप्रदानप्रसङ्गे दीक्षान्तसमरोहादिषु अध्यक्षपीठम् अलङ्करोति।

2. **कुलपतिः**

कुलपतेः नियुक्त्यर्थं कुलाधिपतिना संरचिता एकाचयनसमितिः तदर्थम् अर्हाणाम् एकां तालिकां निर्माति।तालिकातः कुलाधिपतिः एकं व्यक्तिविशेषं कुलपतित्वेन नियोजयितुम् अनुज्ञां ददाति। परिनियमानुगुणमेव कुलपतेः चयनं जायते। कुलपतेः अधीने कुलसचिवः , परीक्षानियन्त्रकः , वित्ताधिकारी, ग्रन्थालयाध्यक्ष, सङ्कायप्रमुखाः , शोधसंसीान निदेशकादयः कार्यं कुर्वन्ति। विश्वविद्यालयस्य प्राधिकरणं प्रबन्धनव्यवस्थां निर्वहति। सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य प्रबन्धनव्यवस्थायाम् एतानि अन्तर्भवन्ति। यथा –

1. **कार्य परिषत्** :– विश्वविद्यालयस्य सुचारुरूपेण सञ्चालनाय विद्यमाना मुख्या परिषत् इत्युक्ते कार्य परिषत् एव वर्तते। इयं परिषत् विश्वविद्यालयस्य नीतिनिर्धारणे तेषाम् अनुप्रयोगे च प्रधानं पात्रं वहति।

2. **विद्यापरिषत्** :– विश्वविद्यालयीयशिक्षायाः , शिक्षणप्रक्रियायाः , प्रशिक्षणस्य, परीक्षायाः , अनुसन्धानकार्यक्रमाणां च स्तरपरिरक्षणकर्मणि विद्यापरिषत् मुख्यं स्थानं भजते।

3.**संकायमण्डलम्** – अध्ययन मण्डलेन उत्सारितं प्रस्तावं विचार्य विद्यापरिषदं प्रतिसारयति।

4. **अध्ययनमण्डलम्** :– विश्वविद्यालयस्य विभिन्नपाठ्यक्रमाणां निर्माणं अध्ययनमण्डलं करोति। अध्ययनमण्डलं काले काले च विभिन्नपाठ्यक्रमाणां संशोधनं परिवर्तनादिकं कृत्वा कृतसंशोधनानां परिवर्तनादीनाम् अनुमोदनाय संकायमण्डलं प्रतिसारयति।

**परिदेवनानिवारणकार्यक्रमः**

परिदेवनानिवारणकार्यक्रमाणां सङ्घटनस्य आधारः विश्वविद्यालयानुदानायोगाधिनियमः –2018 इत्येषः वर्तते। प्रवेशप्रक्रियादिषु छात्राणां समस्याः सन्ति चेदपि एषः अधिनियमः क्रियान्वितः भवति। पुनः विश्वविद्यालयस्य परिदेवनानिवारणकार्यक्रमप्रणाल्याः सुचारुरूपेण सञ्चालनाय विविधाः समितयः रचिताः सन्ति। आभिः समितिभिः गोपनीयतापूर्वकं समस्यायाः वस्तुनिष्ठपरिहारोपायाः संसूच्यन्ते। यौनोत्पीडनसम्बद्धसमितिः , छात्रसमस्यानिवारणसमितिः , कर्मचारिणां सन्तापापनोदनसमितिः इत्याद्याः सक्रियाः समितयः विश्वविद्यालये सन्ति।

**सेवानियमाः , प्रक्रियाः , नियुक्तयः , पदोन्नतिनियमाः च**

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः विश्वविद्यालयानुदानायोगस्य 2018 तमसंवत्सरस्य नियमावलिं समाश्रित्य सेवानियमान् पदोन्नतिनियमान् च निर्धारयति। विश्वविद्यालयस्य अध्यादेशे शिक्षकाणां कार्यालयीयकर्मचारिणां नियुक्तिः सेवानियमाः च सङ्ग्रहेण उल्लिखिताः सन्ति। प्रत्यक्षनियुक्तौ ज्येष्ठतायाः आधारेण नियुक्तौ च विश्वविद्यालयानुदानायोगस्य नियमावलिमेव समाश्रयति विश्वविद्यालयः ।

# *ORGANIZATIONAL STRUCTURE OF THE UNIVERSITY*

